## चरकसंहिता

चिकित्साशास्त्रे अद्यापि चरकसंहिता सर्वबृहत् तथा सर्वतथ्यसमन्वितः ग्रन्थः। अथर्ववेदात् आरभ्य उपनिषद्युगान्तं यावत् अग्निवेशतन्त्रम् एव आसीत् आयुर्वेदशास्त्रस्य प्रधानो ग्रन्थः। चिरं चर्चाभावात् इदं तन्त्रं विनाशं गतम्। भगवान् शेषनागः चरकरूपेण अवतीर्य लुप्तप्रायस्य अग्निवेशग्रन्थस्य संस्कारं साधितवान्। चरकविरचितत्वात् अयं ग्रन्थः चरकसंहितानाम्ना पृथिवीप्रसिद्धः।

ग्रन्थः अयम् अष्टाभिः स्थानैः विभक्तः – सूत्रस्थानम्, निदानस्थानम्, विमानस्थानम्, शारीरस्थानम्, इन्द्रियस्थानम्, चिकित्सितस्थानम्, कल्पस्थानम्, सिद्धिस्थानम्। सम्पूर्णग्रन्थः अयम् विंशति-अधिकशत-अध्यायैः(120) विभक्तः। सूत्रस्थाने आयुर्वेदस्य लक्षणं तथा प्रयोजनं, शारीरिकस्य मानसिकस्य च दोषसमूहस्य विवरणं तथा शरीरस्य स्वाभाविकक्रियायाः दमनस्य विभिन्नव्याधीनाम् उत्पत्तिविवरणम् आलोचितम्। व्याधीनां भेदः, पर्यायः, लक्षणं च निदानस्थाने वर्णितम्। विमानस्थाने कटु-अम्लादिरसानां कार्यकारिता, एषां च रसानां विभिन्नरोगान् प्रति भूमिका च आलोचिता। शारीरस्थानस्य प्रतिपाद्यविषयः तावत् शरीरविन्यासानुसारं रोगाणां भेदनिर्णयः। व्याधीनाम् उद्भवे इन्द्रियाणां भूमिकाविषये विशदम् आलोचनम् इन्द्रियस्थाने वर्तते। राजयक्षा-कर्कटप्रभृति-दुरारोग्य-व्याधीनां चिकित्साप्रणालीः चिकित्सितस्थाने आलोचिता। कल्पस्थाने वर्णितं वनस्पतिभ्यः ओषधप्रस्तुतेः कौशलम्। सत्त्वरम् आरोग्यलाभस्य उपायः, औषधस्य सेव्यासेव्यविचारः प्रभृतिविषयाः सिद्धिस्थाने वर्णिताः।

व्याधीनाम् उत्पत्तेः आलोचनाप्रसङ्गे चरकसंहितायाम् उच्यते यत् मानवशरीरे सर्वविधरोगाणां मूलं भवति वायु-पित्त-कफानां प्रभावः। चरकसंहिता एकदा बहु समादृता आसीत् तस्यैव प्रमाणत्वेन वक्तुं युज्यते – यन्नास्ति चरके तन्नास्ति जगति। चरकसंहितायाः एके टीकाकाराः यथा – चक्रपाणिदत्तः, शिवदासः, गङ्गाधरः, ब्रह्मदेवः प्रमुखाः।

## सुश्रुतसंहिता

आयुर्वेदशास्त्रे चरकसंहितावत् सुश्रुतसंहिता अपि अतिप्रसिद्धा। प्रचलितम् अस्ति यत् इन्द्रः धन्वन्तरये आयुर्वेदशिक्षां दत्तवान्। धन्वन्तरिः च काशीधामे दिवोदासनाम्ना जन्म लब्धवान्। तत्र विश्वामित्रपुत्रः सुश्रतः दिवोदासात् आयुर्वेदशिक्षां प्राप्य ग्रन्थं रचितवान्। स एव ग्रन्थः सुश्रुतसंहिता इति प्रसिद्धः।

सुश्रतसंहितायाः पञ्च स्थानानि सन्ति – सूत्रस्थानम्, निदानस्थानम्, शरीरस्थानम्, चिकित्सास्थानम् कल्पस्थानं च। ग्रन्थान्ते षट्षष्टि-अध्यायैः विभक्तम् उत्तरतन्त्रं सन्निविष्टम्। सुश्रुतसंहितायां शल्यतन्त्रं सप्तभिः भागैः विभक्तम्। विषप्रयोगे ततः रक्षोपायः, अस्थिभङ्गे अस्त्रप्रचारोपायः, मस्तिष्के शल्यचिकित्सा इत्यादिविषयाः सुश्रुतसंहितायां सुविस्तृतं वर्णिताः। अस्य ग्रन्थस्य बहवः टीकाकाराः सन्ति – जेज्जटः, श्रीमाधवः, चक्रपाणिः प्रमुखाः।

**भेलसंहिता**

आचार्यभेलेन विरचिता संहिता भेलसंहिता इति नाम्ना प्रसिद्धा। विशेषतः चरकसंहिताया एव गुरुत्वमेव अस्मिन् ग्रन्थे वर्णितम् अस्ति। अस्यां संहितायाम् अष्टौ स्थानानि सन्ति – सूत्रस्थानम्, निदानस्थानम्, विमानस्थानम्, शरीरस्थानम्, इन्द्रियस्थानम्, चिकित्सास्थानम्, सिद्धिस्थानम्, कल्पस्थानम् च। भेलसंहिता इयं त्रयोदशाधिकशत-अध्यायैः विभक्ता। विजयरक्षितः, श्रीकण्ठः, शिवदासः प्रमुखाः पण्डिताः भेदसंहितातः उद्धृतिं कृतवन्तः। चरकसंहिताया अनुरूपा अपि एषा संहिता उपस्थापनारीत्या भिन्ना एव।

**अष्टाङ्गसंग्रहः**

आयुर्वेदस्य अष्टौ एव अङ्गानि वाग्भट्टविरचिते अस्मिन् ग्रन्थे संगृहीतानि सन्ति। अत्र षट् स्थानानि सन्ति-

1) सूत्रस्थानम्- सूत्राकारेण आयुर्वेदे पालनीयाः नियमाः वर्णितिः अत्र।
2) शरीरस्थानम्- अत्र शरीरस्य धर्मविभागः, शिराधमनिप्रभृतीनां विभागः तथा कार्यकारिता, मरणज्ञापकं रिष्टलक्षणं प्रभृतिविषयाः विशदं वर्णिताः।
3) निदानस्थानम्- अत्र विभिन्नरोगाणां लक्षणम् उपसर्गो वा वर्णितम्।
4) चिकित्सास्थानम्- अत्र सकलरोगाणां चिकित्सापद्धतिः, पथ्यापथ्ययोः व्यवस्था निर्दिष्टा।
5) कल्पस्थानम्- अत्र पञ्चकर्मचिकित्साविधिः आलोचितः।
6) उत्तरस्थानम्- शिशुचिकित्सा, भूतविद्या, अस्थिभङ्गादिचिकित्सा, विषचिकित्सा प्रभृतिविषयाणां विस्तृतं विवरणम् अत्र प्राप्यते।

**अष्टाङ्गहृदयः**

अयमपि ग्रन्थः वाग्भट्टेन विरचितः। अत्र षट् स्थानानि सन्ति – सूत्रस्थानम्, शरीरस्थानम्, निदानस्थानम्, चिकित्सास्थानम्, कल्पस्थानम् तथा उत्तरस्थानम्। एषु स्थानेषु सूत्रस्थानं सर्वापेक्षया उत्कृष्टं विद्यते। अष्टाङ्गहृदयग्रन्थः अयं ज्वरातिसारः, शिशुचिकित्सा, शल्यतन्त्रम्, रसायनतन्त्रम् प्रभृतिविषयाणाम् आलचनया सुसमृद्धो वर्तते।

**रसरत्नसमुच्चयः**

वाग्भट्टप्रणीते अस्मिन् ग्रन्थे रसायनभेषजस्य सेवनविधिः वर्णितः। वाग्भट्टस्य मतेन समयानुसारम् औषधसेवनेन सुफलं प्राप्यते। अस्मिन् ग्रन्थे त्रिंशत् अध्यायाः सन्ति। राजयक्षा-अश्वप्रभृतीनां रोगाणां चिकित्सोपायः चतुर्दशपञ्चदशाध्याययोः वर्णितः अस्ति।

**रुग्विनिश्चयः**

**(आयुर्वेदशास्त्रे माधवकरस्य अवदानम् आलोचयत।)**

आयुर्वेदशास्त्रे अन्यतमं प्रसिद्धं नाम भवति आचार्यः माधवकरः। इन्दुकरस्य पुत्रः माधवकरः रुग्विनिश्चयनामकम् एकम् आयुर्वेदशास्त्रं रचितवान्। ग्रन्थस्यास्य रचनासमयः प्रायः खिष्टीयसप्तमशतकस्य शेषार्धः। ग्रन्थः अयं निदाननाम्ना सुप्रसिद्धो वर्तते। माधवकरमते रोगोत्पत्तौ पञ्च स्तरभेदाः सन्ति –

1) निदानम्- येन रोगोत्पत्तिः भवति तत् निदानम्।
2) पूर्वरूपम्- रोगात् पूर्वं तस्य कानिचन लक्षणानि दृश्यन्ते तत् पूर्वरूपम्।
3) रूपम्- येन लक्षणेन रोगस्वरूपं निश्चीयते तत् रूपम्।
4) उपशयः- येन रोगस्य उपशमो भवति सः उपशयः
5) सम्प्राप्तिः- वायुपित्तादिदोषेषु कुपितेषु ये रोगाः भवन्ति तेषां आनुपूर्विकं विवरणं सम्प्राप्तिः उच्यते।

अस्मिन् रुग्विनिश्चयग्रन्थे मृत्योः अव्यवहितपूर्ववर्तिलक्षणानि अपि व्याख्यातानि।

माधवकरः चिकित्सानामकम् अपरमेकं ग्रन्थं विरचितवान्। तत्र रोगाणां चिकित्सापद्धतिः विशदं वर्णिता। माधवकरः सुश्रुतसंहितायाः एकं टीकाग्रन्थमपि रचितवान् – सुश्रुतश्लोकवार्तिकम्।

**चिकित्सासारसंग्रहः**

**(आयुर्वेदशास्त्रे चक्रपाणिदत्तस्य अवदानम्)**

खिष्टीय-एकादशशतके चक्रपाणिदत्तः चिकित्सासारसंग्रहः इति नामकम् एकम् आयुर्वेदग्रन्थं रचितवान्। नारायणदत्तस्य पुत्रः चक्रपाणिः स्वग्रन्थे रोगनिर्धारणं तथा धातवद्रव्याणां गुणागुणयोः विवरणं कृतवान्। आयुर्वेदशास्त्रदृष्ट्या अयमेकः मौलिको ग्रन्थः। एतद्व्यतिरेकेण चक्रपाणिः शब्दचन्द्रिकानामकम् आयुर्वेदशास्त्रस्य अभिधानं कृतवान्। चरकसंहितायाः टीका आयुर्वेददीपिका, श्रुतसंहितायाः टीका भानुमती अपि अनेन रचिता। एवं द्रव्यगुणसंग्रहनामकम् अपरमेकं ग्रन्थं चक्रपाणिः रचितवान्। अत्र औषधीनां तथा पारदप्रभृतिधातूनां कार्यकारिता रोगप्रतिरोधक्षमता च आलोचिता।